आवर्त्तनी, स्त्री, (आङ्+वृत्+ल्युट्+ङीप्।) धातुद्रव्यद्रावणार्थमृत्पात्रं। मुछी इति भाषा। तत्पर्य्यायः। तैजसावर्त्तनी २ मूषा ३ मूषः ४। इति शब्दरत्नावली॥

आवर्त्तमणिः, पुं, (आवर्त्तनाकारो मणिः।) राजावर्त्तनामोपरत्नं। इति राजनिर्घण्टः॥

आवर्त्तिनी, स्त्री, (आवर्त्त+इनि+ङीप्।) अजशृङ्गीवृक्षः। इति रत्नमाला॥

आवर्हितः, त्रि, (आङ्+वृह्+क्तः।) उन्मूलितः। उत्पाटितः। इति हेमचन्द्रः।

आवलिः, स्त्री, (आङ्+वल+इन्।) श्रेणी। पंक्तिः। इत्यमरः॥

आवली, स्त्री, (आङ्+वल्+इन्+ङीप्।) आवलिः। इत्यमरः॥ (यथा अमरुशतके ३॥ "आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं"। "दिशावलीव्याजनिशाकरांशुभिः"। इति माघे १।२५।)

आवल्यं, स्त्री, (अवल+ष्यञ्।) अवलस्य भावः दौर्ब्बल्यं॥

आवश्यकं, त्रि, (अवश्य+मनोज्ञादित्वाद्वुञ्। अव्ययानां भमात्रे इति टिलोपः।) अवश्यकर्त्तव्यं। नैश्चयिकं। उचितं। यथा। "ण्यणोरावश्यके। उवर्णान्तादावश्यकेऽर्थे घ्यण् स्यात्"। इति मुग्धबोधव्याकरणं॥ किञ्च। आवश्यकपर्व्वादिक्रियमाणस्य नित्यनैमित्तिकत्वं। इति तिथ्यादितत्त्वं॥ (यथा साहित्यदर्पणे, "आवश्यकानां कार्य्याणां अविरोधाद्विनिर्म्मितः"।)

आवसथं, स्त्री, (आवसन्ति आगत्य वसन्ति अस्मिन्। आङ्+वस+अथच्।) गृहं। इति हेमचन्द्रः॥ (वसतिस्थानं। विश्रामस्थानं। अग्निगृहं। अग्निहोत्रस्थानं।
रघुवंशे, ८।१४ "निवसन्नावसथे पुराद्बहिः"। मनुः। ३।१०७।
"आसनावसथौ शय्यामनुव्रज्यामुपासनाम्"।)

आवसथः, पुं, (आवसन्त्यत्र। आ+वस+अधिकरणे अथच्।) गृहं। (यथा, हितोपदेशे मित्रलाभे "अस्ति चम्पकाभिधानायां नगर्य्यां परिव्राजकावसथः"।) आर्य्याकोषः। आर्य्याच्छन्दसो यतिभेदः। व्रतविशेषः। इत्युणादिकोषः॥

आवसितं, त्रि, (आवस्यते आच्छाद्यते आङ्+वस् आच्छादने+क्तः।) परिपक्वमर्द्दितधान्यं। इति भरतः॥ बहुलितधान्यं। इति सुभूतिः॥ सम्पन्नधान्यं। इत्यन्ये॥ तत्पर्य्यायः ऋद्धं २। इत्यमरः॥

आवहः, पुं, (आभिमुख्येन वहतीति। आङ्+वह्+अच्।) सप्तवाय्वन्तर्गतवायुविशेषः। स च भूवायुः। इति पुराणज्योतिषे।
(यथा, मनुः, ८।३४७।
"द्वौ शुक्लज्योतिरादित्यौ नन्दो हरिस्तपास्तथा।
चित्रज्योतिः सत्यज्योतिर्ज्योतिष्मान् स्कन्ध आवहः"॥ इति प्रापकः। जनकः। यथा मनुः,—
"समुत्सृजेत्साहसिकान् सर्व्वभूतभयावहान्"।
रघुवंशे। १४।५, "क्लेशावहा भर्त्तुरलक्षणाहं"।)

आवहमानं, त्रि, (आङ्+वह्+शानच्।) क्रमागतं॥ (परम्परागतं, धारावाहि।)

आवाधा, स्त्री, (आ सम्यक् वाधा।) दुःखं। पीड़ा। इति शब्दरत्नावली। भूखण्डं। त्रिकोणक्षेत्रमध्यरज्जुनिक्षेपेण यत् खण्डद्वयं जायते तत्। इति लीलावती॥

आवापः, पुं, (आ वपन्ति सलिलमत्र। आङ्+वप्+घञ्।) आलवालं। इत्यमरः॥ वलयः। (यथा महाभारते १४ पर्व्वणि।
"मोहात् पपात गाण्डीवमावापं च करादपि"।) शत्रुचिन्तनं। (पराराष्ट्रचिन्तनम्। यथा, माघे। २।८८।
"तन्त्रावापविदा योगैर्म्मण्डलान्यधितिष्ठता"।) पात्रभेदः। इति हेमचन्द्रः॥ भाण्डवपनं। परिक्षेपः। इति मेदिनी॥ निम्नोन्नतभूमिः। इत्यजयः॥ पात्रं। इति शब्दरत्नावली॥ प्रधानहोमः। इति स्मृतिः॥

आवापकः, पुं। (आ उप्यते इति। आङ्+वप्+कर्म्मणि घञ्+संज्ञायां कन् वा।) वलयः। इत्यमरः॥

आवापनं, स्त्री, (आवाप्यतेऽनेनेति आङ्+वप्+णिच्+करणे ल्युट्।) सूत्रयन्त्रं। इति शब्दमाला॥ तांत् इति भाषा।

आवारि, स्त्री, (आङ्+वृ+इ।) हट्टवेश्म। इत्यादिकोषः॥ दोकान हाट्चालि इत्यादि भाषा।

आवालं, स्त्री, (आङ्+वल्+घञ्।) आलवालं। इत्यमरः॥ (वालकमभिव्याप्य इत्यर्थे।) वालकपर्य्यन्तम्॥

आवाल्यं, स्त्री, (वाल्यात् आ आवाल्यं पर्य्यन्तार्थेऽव्ययीभावः।) वाल्यावस्थापर्य्यन्तं॥ (यथा धर्म्मविवेके,—"आवाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्"।)

आवासः, पुं, (आ वसन्ति अत्र इति। आङ्+वस्+अधिकरणे घञ्।) गृहं इति हेमचन्द्रः॥ (यथा गीतगोविन्दे। ४।१०।
"आवासो विपिनायते प्रियसखीमालापि जालायते"।)

आवाहनं, स्त्री, (आङ+वह्+णिच्+ल्युट्।) आह्वानं। निमन्त्रणं। यथा,—
"प्रतिमास्थानेष्वप्सु नावाहनविसर्ज्जने"।
इति। विनायकादीनां व्याहृतिभिरावाहनमाह मत्स्यपुराणं।
"विनायकं तथा दुर्गां वायुमाकाशमेव च।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ"॥
इति च तिथ्यादितत्त्वं॥ आवाहनीमुद्रा मुद्राशब्दे द्रष्टव्या॥

आवाहनी, स्त्री, (आवाह्यतेऽनया। आङ्+वह्+णिच्+करणे ल्युट् ङीप्।) मुद्राविशेषः। यथा,
"हस्ताभ्यामञ्जलिं बद्धानामिकामूलपर्व्वणोः।
अङ्गुष्ठौ निःक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता"॥
इति तन्त्रशास्त्रं॥

आविः, [स्] व्य, (अवते। उङ्शब्दे+इस्।) प्राकाश्यम्। प्रस्फुटत्वं। तत्पर्य्यायः। प्रादुः २। इत्यमरः॥

आविकः, पुं, (अविना मेषलोम्ना कृतम् इति अवि+ठक्।) कम्बलं। इति हलायुधः॥ (त्रि, मेषलोम्ना निर्म्मितं, । २।४१
"वसोरन्नानुपूर्व्व्येण शाणक्षौमाविकानि च"।
मेड़ीदुग्धं। यथा वैद्यके,—
"आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्॥
गुरु कासेऽनिलोद्भूते केवले चानिले वरम्"।
इति।)

आविग्नः, पुं, (आङ्+विज्+क्तः।) अविग्नः। करमर्द्दकः। इति शब्दरत्नावली॥ पाणि आमला इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ (उद्विग्नः उत्कण्ठितः।)

आविर्भावः, पुं, (आविस्+भू+घञ्।) प्रकाशः। देवावतरणं। प्रादुर्भावः। यथा,—
"तदा मे मनसा ध्यातो दयासिन्धुर्जनार्दनः।
भक्तानामनुकम्पार्थं यस्याविर्भावमिच्छति"॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि २ अध्यायः॥

आविर्भूतः, त्रि, (आविस्+भू+क्त।) प्रकाशितः। अधिष्ठितः। जन्मयुक्तः। अवतीर्णः। प्रादुर्भूतः। आविर्भावविशिष्टः। यथा,—
"उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ।
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते पूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणेराविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः"॥
"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी।
आविर्भूता महाघोरा योगिनीकोटिभिः सह"॥
इति च तिथ्यादितत्त्वम्॥

आविष्कारः, पुं, (आविस्+कृ+घञ्।) प्रकाशः॥ (यथा साहित्यदर्पणे, २ परिच्छेदे।
"आविष्कारातिशयशाभिधेयवत् स्फुटं प्रतीयते"।)

आविष्कृतः, त्रि, (आविस्+कृ+क्तः।) प्रकाशितः। तत्पर्य्यायः। प्रकटितः २। इति हेमचन्द्रः। (यथा उत्तरचरिते, षष्ठाङ्के। "आविष्कृतं कथाप्रावीण्यं वत्सेन"।)

आविष्टः, त्रि, (आ+विश+क्तः।) प्रेतवाहितः। भूतादिग्रस्तः। इति त्रिकाण्डशेषः॥ आवेशयुक्तः। निविष्टः॥ (उपहतः। यथा कामन्दकः,
"आविष्टइव दुःखेन तद्गतेन गरीयसा"।)

आवीरचूर्णं, स्त्री, (आवीरमेव चूर्णम्।) फल्गु। फागु इति वङ्गभाषा। आवीर इति हिन्दीभाषा। यथा,—
"चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतं।
आवीरचूर्णं रुचिरं गृह्यतां परमेश्वर"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

आवुकः, पुं, (अवति रक्षतीति। अव+बाहुलकात् उण्+कन्।) नाट्योक्तौ पिता। इत्यमरः॥

आवृत्, स्त्री, (आङ्+वृत्+क्विप्।) अनुक्रमः। परिपाटी। इत्यमरः॥ (प्रकारः। जातकर्म्मादिक्रियाकलापः। यथा मनुः, ३।२४८। २।६६।
"अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः"।